International Journal of Sanskrit Research 2022; 8(6): 182-185

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(6): 182-185
© 2022 IJSR
www.anantaajournal.com
Received: 12-09-2022
Accepted: 20-10-2022

**डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः, सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी,
उत्कलाः, भारत

**Corresponding Author:**
**डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः, सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी,
उत्कलाः, भारत

# अद्वैतवेदान्ते मोक्षनिरूपणप्रसङ्गे पूर्वपक्षस्यावदानम्

## डॉ. नन्दिघोषमहापात्रः

**सारांशः**
दुःखमयेऽस्मिन् संसारे आत्यन्तिकदुःखनिवृत्तिः परमानन्दसुखावाप्तिश्च सर्वेषां प्राणभृतां परमं लक्ष्यम्। तदेव मोक्षपदेनाभिधीयते। तन्निमित्तं सर्वाण्यपि शास्त्राणि प्रवृत्तानि । अद्वैतवेदान्तदर्शने दर्शनान्तरमतखण्डनपुरस्सरं मोक्षनिरुपणप्रसङ्गः समुपस्थापितः । तत्र काचित् सरणिः अनुसृता । विषयः, संशयः, पूर्वपक्षः, उत्तरपक्षः निर्णयश्चेति पञ्चभिः परमसुखरूपः मोक्षः विचारितः । तत्र पूर्वपक्षस्य महद्योगदानं वर्तत ।

**कूटशब्दः** दुःखमयेऽस्मिन् संसारे, परमानन्दसुखावाप्तिश्च, मोक्षनिरुपणप्रसङ्गः

## प्रस्तावना

भारतीयशास्त्रपरम्परायां विषयप्रतिपादनाय कश्चन क्रमः ज्ञानगरिष्ठैः तपोबलिष्ठैः ऋषिभिः निरूपितः, यमनुसृत्य भारतीयज्ञानगङ्गा प्रवहति । सामान्योऽयं नियमः यत् कस्मिंश्चिद् विषये यदा संशयो जायते तदानीमेव तस्य विषयस्य प्रतिपादने नूतनतत्त्वाविष्करणे वा रुचिरुपद्यते तदानीं विषयस्य प्रतिपादनं समीचीनं न वेति विचारः पक्षद्वयसापेक्षः । तत्र कश्चित् पूर्वपक्षः प्राश्निकपक्षः तदन्यः उत्तरपक्षः । द्वयोः पक्षयोः वचनानां तर्काणां वा श्रवणानतन्तरं किञ्चित् उत्कृष्टं विशुद्धं बाधरहितं तत्त्वं समायाति । अत एव तपोधनैः भारतीयमहर्षिभिः विषयसंशयपूर्वपक्षोत्तरपक्षसङ्गतिरूपपञ्चावयवाः शास्त्रपरम्परायामुपयनीकृताः । तदुक्तम् –

> विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
> निर्णयश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम् ।।[1] इति ।।

तत्र सिद्धान्तविरुद्धकोटिः पूर्वपक्षः। शास्त्रीयसंशयनिरासार्थः प्रश्नः। प्रकृतार्थविरोधितर्कोपन्यासरूपोऽधिकरणाङ्गविशेषः वा पूर्वपक्षः[2] । यदि पूर्वपक्षः न स्यात्तर्हि शास्त्रसमस्यानां समधानमपि नाभविष्यत् विषयस्य स्पष्टतापि न स्यात् यथा प्रवाहितजलस्य एकत्रीकरणं बन्धनिर्माणेन भवति येन सुखं भवत्यस्माकं तथैव विषयाणां सम्यक् प्रतिपादनाय पूर्वपक्षस्यावश्यकता वरीवर्ति ।

भारतीयवाङ्ग्मये अद्वैतवेदान्तदर्शनपरम्परायां पूर्वपक्षस्यावदानं किञ्चिद्विशिष्टं स्थानमधिकरोति । अद्वैतवेदान्तदर्शनं भगवता शङ्कराचार्येण प्रवर्तितम् । ब्रह्मैव नित्यं तत्त्वमन्यदखिलमनित्यमिति तत्र प्रतिपादितम् । ऋग्वेदे वागम्भृणीसूक्तस्य दशममण्डले सर्वत्र एकतत्त्वानुभवादनन्तरस्थितिं सूचयति । तद्यथा-

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वेदेवैः ।[3]
एवमेव एकस्यैवात्मतत्त्वस्यानुभवविषये -

अहं मनुरभवं सूर्यश्चाहं कक्षीवा ऋषिरस्मि विप्रः ।[4]

इदमेव ऋग्वेदसूक्तं भगवद्बादरायणविरचितेन ब्रह्मसूत्रेण पल्लवितं श्रीगौडपादाचार्यविरचितया माण्डुक्यकारिकया पुष्पितं, शङ्कराचार्यविरचितेन ब्रह्मसूत्रभाष्येण सुफलितं वेदान्तदर्शनस्य मूलस्रोतः। भरतीयदर्शनेषु अद्वैतवेदान्तदर्शनं सर्वथा सर्वतः सर्वदा सर्वत्र च भेदनिवारकं तन्मूलकं भयनिवारकं च मूर्धन्यभूतं दर्शनमिति। तत्रापि सर्वेषां दर्शनानां मूलप्रयोजनभूतमोक्षस्वरूपनिरूपणप्रसङ्गे दर्शनमिदं किञ्चिद्विशिष्टं स्थानमधिगच्छति । अथ कोऽयं मोक्षः? किञ्चास्य स्वरूपम्? कथं अधिगतिरस्य?
धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु मोक्ष एव परमपुरुषार्थः, तस्य नित्यत्वात् । तत्समर्थयति श्रुतिरपि - न स पुनरावर्तते[5] इति। किञ्च तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्रपुण्याचितो लोकः क्षीयते[6] इति श्रुत्या मोक्षातिरिक्तानां धर्मादीनामनित्यत्वावगमाच्च । विद्यानिरस्ताविद्यातत्कार्यब्रह्मभावापत्तिर्मोक्षः । स च मोक्षः विश्वमायानिवृत्तिरूप आनन्दावाप्तिरूपश्च । भूयश्चान्ते विश्वमायां निवृत्तिरिति श्रुतेः तरति शोकमात्मविद्[7] । ब्रह्मवेद ब्रह्मैव भवति[8] ब्रह्मविदाप्नोति परम्[9] इत्यादि श्रुतेः । आनन्दरूपं ब्रह्म परं तदवाप्तिः मोक्षः । तटस्थः रूपापत्तिः तदैक्यापत्तिर्वा तदवाप्तिः । एवम् आत्मैव ब्रह्मस्वरूपम् । स आत्मा नित्योपलब्धिस्वरूपप्राप्तः । अथ किमर्थं तदुपलब्धयेऽऽयासः । प्राप्तस्यापि मोक्षस्वरूपस्य नित्यस्यात्मनः अनाद्यविद्योपधानेनाप्राप्तस्येव प्राप्तिः विद्यया वेदान्तवाक्यश्रवणादिजन्यया क्रियते । यथोक्तमाचार्यवाचस्पतिमिश्रेण -
द्विविधं हि इप्सितं पुरुषस्य । किञ्चिदप्राप्तं ग्रामादि किञ्चित्पुनः प्राप्तमपि भ्रमवशादप्राप्तमित्यवगतं यथा स्वग्रीवावनद्धं ग्रैवेयकम् । एवं जिहासिकमपि द्विविधं किञ्चिदहीनं जिहासति यथा बलयितचरणं फणिनं किञ्चित्पुनः हीनमेव जिहासति। यथा चरणाभरणे नूपुरे फणिनमारोपितम् ।[10] एवं शुद्धबुद्धमुक्तस्वरूपसच्चिदानन्दात्मनि मोक्षस्वरूपरूपनित्यप्राप्तमप्यनाद्यविद्यावशादप्राप्तमिव जातं ब्रह्मविद्यया तिरोधायकाविद्याव्यपगमात् प्राप्तमित्युच्यते ।
अतः मोक्षस्यात्मस्वरूपत्वात् नित्यत्वमङ्गीक्रियते । दर्शनान्तरेष्वपि मोक्षस्य नित्यत्वं स्वीकृतम् । नो चेत् कदाचित् पुनर्बन्धः स्यात् । यद्यपि मोक्षस्वरूपविषये दार्शनिकानां मतैक्यं नास्ति, तथापि तस्य नित्यत्वविषये सर्वेषां मतं समानमेव ।
यदि मोक्षो नाम न आत्मलाभः तर्हि तस्य आत्मनः अलब्धत्वात् तत्प्राप्तये प्रयासः नावश्यकः । न हि लब्धस्य भ्रमवशात् अलब्धवत् लाभः । किञ्च यदि मोक्षो नाम न आत्मलाभः तर्हि अविद्यातज्जन्यप्रपञ्चस्य बन्धत्वमात्मस्वरूपतिरोधायकत्वम् अङ्गीक्रियते । स च प्रपञ्चः अध्यारोपितः मायापरिणामभूतः आविद्यिक एव । ब्रह्माश्रयविषयकाविद्यामूलत्वात्
ब्रह्माश्रयविषयकज्ञाननिर्वर्त्यत्वात्। ब्रह्मविद्यया आत्मस्वरूपतिरोधायकाविद्यायाः विनाशात्, संसारबन्धनिवृत्त्या प्राप्तस्यापि आत्मनः अप्राप्तवत्प्रापणं भवतीति वाच्यम्। अपि तु सत्यस्यापि सुखदुःखधर्माधर्माद्येकविंशतिदुःखानां ज्ञानेन ध्वंसो भवति, स एव मोक्षः। ज्ञानञ्च पदार्थानां साधर्म्यवैधर्म्यज्ञानपूर्वकविवेकविज्ञानमेव, न ब्रह्मवृत्तिः । ब्रह्मणः जीवात्मत्वाभावात्। अतः पदार्थानां विवेकविज्ञानादेव एकविंशतिदुःखध्वंसरूपः मोक्षः सम्भवतीति चेत् न । यतो हि तरति शोकमात्मविद्[11], ब्रह्मवेद ब्रह्मैव भवति[12] इत्यादि श्रुत्या आत्मज्ञानी एव शोकतरणरूपमोक्षं प्राप्नुयादिति । अथ च एकमेवाद्वितीयम्[13] इत्यादि श्रुत्या ब्रह्मणः सजातीयविजातीयस्वगतभेदशून्यत्वमङ्गीक्रियते, तत्त्वमस्यादिश्रुत्या च जीवब्रह्मणोरैक्यत्वं प्रतिपाद्यते । अतः ब्रह्मभावापत्तिरेव मोक्षः । स च ज्ञातात्मस्वरूपः ब्रह्मज्ञानादेव सम्भवति । अत एवोक्तं श्वेताश्वतरोपनिषदि -

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।।[14]
इति ।

बन्धाद्विमुक्तिरित्युच्यते तर्हि कोऽयं बन्धः इत्यस्य समाधानमुच्यते -

आत्मनोऽज्ञानतत्कार्यसम्बन्धः ।[15] इति

अविद्यैव बन्धः तदस्तमय एव मोक्षः इति तदुक्तम् -

अविद्यास्तमयो मोक्षः सा च बन्ध उदाहृतः ।
निवृत्तिरात्ममोहस्य ज्ञातत्वेनोपलक्षितः ।।[16]

आचार्यसुरेश्वरः अविद्या एव संसारस्य बीजम्, तदुच्छेदे च मुक्तिरिति वक्ति -

अविद्या संसृतेर्बीजं तन्नाशे मुक्तिरात्मनः ।[17]

अतः सर्वस्यापि अविद्याकल्पितस्य प्रपञ्चस्य अविद्यामूलकत्वेन अविद्यैव बन्धः तन्निवृत्तिरेव मोक्षः । अतः अविद्यायाः निवर्तितत्वात् अविद्यायाः अपि ब्रह्मभिन्नं वस्त्वन्तरत्वं कल्पनीयम्, येन द्वैतापत्तिः स्यात् इति चेत् न । सा च ज्ञातत्वेनोपलक्षितात्मरूपैव भवति । ब्रह्मातिरिक्तं न किमप्यवशिष्यते । अतः न तत्र द्वैतापत्तेरवकाशः ।
संसारस्यास्य बन्धरूपस्य ज्ञानेन निवृत्तिर्भवति । अतः संसारस्याज्ञानमयत्वमङ्गीकृतम् । ब्रह्मज्ञानेन तद्विरोधिभूतस्याज्ञानस्य निवृत्तौ तत्कार्यस्यापि प्रपञ्चस्य निवृत्तौ प्राप्तस्येव आत्मस्वरूपस्य अप्राप्तवत्प्राप्तिः सम्भवति । यदज्ञानेनैव संसारापत्तिः तद्ज्ञानेनैव निवर्तते सा इति वचनानुसारं यथा शुक्तिविषयकाज्ञानात् तत्र रजतापत्तिः शुक्तिविषयकज्ञानेनैव निवर्तते, तथैव अज्ञानोपाधिना एव ब्रह्मणि संसारापत्तिर्भवति ज्ञाते ब्रह्मणि च तदज्ञानं यदा निवर्तते तदानीं नित्यशुद्धबुद्धमुक्तस्वरूपस्यात्मनः साक्षात्कारो जायते । स चात्मसाक्षात्कारः मोक्षः । अत एवोक्तम् -

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।[18] इति ।।

किञ्चोक्तम् –

न कर्मणा न प्रजया धनेन
त्यागेनैके अमृतत्वमानशुः ।
परेण नाकं निहितं गुहायां
विभ्राज्यते यद्यतयो विशन्ति ।।[19]

मुक्तावस्थायां जीवः आप्तकामो भवति आत्मतृप्तो भवति, यदा कामनाः छिन्नाः भवन्ति तदानीं मरणधर्मी जीवः अमृतत्वं लभते । तदुक्तम् –

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ।।[20]
मुक्तावस्थायां सर्वाण्यपि कर्माणि क्षीयन्ते ।

कर्मक्षये सति संस्कारनाशो भवति । संस्कारनाशे च शरीरधारणप्रक्रिया नश्यति । तदुक्तं मुण्डके –

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।।[21]

वस्तुतः जीवब्रह्मणोः ऐक्ये यदज्ञानावरणं तस्यैव निवृत्तिसम्पादनं मुक्तिः । यद्यपि इयं मुक्तिः ज्ञानैकसाध्या इति पूर्वोक्तम्, तथापि कर्म भक्तिः च तत्साधनान्तरं भवतीति दर्शनान्तरेषु अवगम्यते । चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये[22] इति भगवत्पादवचनं ज्ञापयति यत् यद्यपि कर्मणा साक्षात् ब्रह्मावगमः न भवति तथापि परम्परया तु भवत्येव । कर्मणा चित्तशुद्धिः चित्तशुद्ध्या च ज्ञानावाप्तिः, ज्ञानाच्च मुक्तिः इति क्रममुक्तिः कर्मणा जायते इति आशयः । किञ्च निष्कामकर्मसम्पादनेन एव ज्ञानं प्राप्तुं शक्यते इति वर्णयति गीताचार्यः -

काम्यानां कर्मणां न्यासं सन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ।।[23]

भक्तिरपि मोक्षसाधने हेतुर्भवति इति शास्त्रेषु प्रतिपादितम् । परा भक्तिः ज्ञानिनः एव भवति सा च ज्ञानस्वरूपा वर्तते । तया च मुक्तिः सम्भवति इति आचार्यैः तत्तत् शास्त्रेषु उपनिबद्धितं दृश्यते ।
ज्ञानमेव मुक्त्यर्थं साधनमिति वेदान्तविदामाशयः । ज्ञानमेव साधनमात्मसाक्षात्कारार्थमात्मदर्शनार्थमिति आत्मसाक्षात्कारोपायः प्रदर्शितः बृहदारण्यके -

"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" ।[24]

एवं मोक्षनिमित्तं न कर्म साक्षात्साधनं न वा भक्तिः । ब्रह्मसाक्षात्काराद् ब्रह्मविज्ञानाद् वा अविद्यानिवृत्तौ मोक्षः सम्भवतीति शम् ।।

## पादटिप्पणी

1 - स.द.सं.पृ. २
2 - सर्वलक्षणसंग्रहः पृ.८१
3 - ऋ.वे.१०-१२५-१
4 - ऋ.वे-४-२६-६
5 - छा.उ. ८-१५-१
6 - छा.उ. ८-१-६
7 - श्वे.उ. ६-१५
8 - मुण्डको. २-२-९
9 - तैत्ति. २-१-१
10 - भामती. १-१-४
11 - श्वे.उ. ६-१५
12 - मुण्डको. २-२-९
13 - छा.उ. ५-२-१
14 - श्वे-६-१५
15 - स.द.सं - पृ – ९२
16 - शाङ्करदर्शनमर्मप्रकाशः पृ.-१४९
17 - नैष्कर्म्यसिद्धिः १-७
18 - ई.उ – ११
19 - महानारायणोपनिषद् - १०-५
20 - कठ - २-३-१४
21 - मुण्ड. २-२-८

22 - वि.चू. ११
23 - गी. १८-२
24 - बृ.उ.२-४-५

**सन्दर्भग्रन्थाः**


1. ब्रह्मसूत्रशाङ्करभाष्यम्
2. विवेकचूडामणिः
3. श्रीमद्भगवद्गीता
4. उपनिषदः
5. शाङ्करदर्शनमर्मप्रकाशः
6. वेदान्तपरिभाषा
7. नैष्कर्म्यसिद्धिः
8. भारतीय दर्शन
9. भारतीय दर्शन की चिन्तनधारा
10. सर्वदर्शनसंग्रहः